# પરમાત્માષ્ટકમ

## Paramatma Ashtakam

---

પરમાત્મા અષ્ટકમ |

પરમાત્મંસ્તવ પ્રાપ્તૌ કુશલોઽસ્મિ ન સંશયઃ |
તથાપિ મે મનો દુષ્ટં ભોગેષુ રમતે સદા ||૧||

યદા યદા તુ વૈરાગ્યં ભોગેભ્યશ્ચ કરોમ્યહમ |
તદૈવ મે મનો મૂઢં પુનર્ભોગેષુ ગચ્છતિ ||૨||

ભોગાન્ભુક્ત્વા મુદં યાતિ મનો મે ચઞ્ચલં પ્રભો |
તવ સ્મૃતિ યદા યાતિ તદા યાતિ બહિર્મુખમ ||૩||

પ્રત્યહં શાસ્ત્રનિચયં ચિન્તયામિ સમાહિતઃ |
તથાપિ મે મનો મૂઢં ત્યક્ત્વા ત્વાં ભોગમિચ્છતિ ||૪||

શોકમોહૌ માનમદૌ તવાજ્ઞાનાદ્ભવન્તિ વૈ |
યદા બુદ્ધિપથં યાસિ યાન્તિ તે વિલયં તદા ||૫||

કૃપાં કુરુ તથા નાથ ત્વયિ ચિત્તં સ્થિરં યથા |
મમ સ્યાજ્જ્ઞાનસંયુક્તં તવ ધ્યાનપરાયણમ ||૬||

માયયા તે વિમૂઢોઽસ્મિ ન પશ્યામિ હિતાહિતમ |
સંસારાપારપાથોધૌ પતિતં માં સમુદ્ધર ||૭||

પરમાત્મંસ્ત્વયિ સદા મમ સ્યાન્નિશ્ચલા મતિઃ |
સંસારદુઃખગહનાત્ત્વં સદા રક્ષકો મમ||૮||

પરાત્મન ઇદં સ્તોત્રં મોહવિચ્છેદકારકમ |
જ્ઞાનદં ચ ભવેન્નૄણાં યોગાનન્દેન નિર્મિતમ ||૯||

ઇતિ શ્રીયોગાનન્દતીર્થવિરચિતં પરમાત્માષ્ટકં સંપૂર્ણમ ||



---